विभावरीश्वरस्मेरकरसोदरकीर्त्तयः । ददत्वमन्दमानन्दं विजयानन्दसूरयः ॥ १ ॥

श्रीआत्मानन्दजयग्रन्थमाला मौक्तिकः (२)

# ॥ श्रीसंप्रतिनृपतिचारित्रम् ॥

संशोधकः जैनाचार्यन्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीश्वराऽपरनामश्रीमदात्मारामजीमहाराजशिष्यदक्षिणविहारि-
श्रीमदमरविजयमुनिपुङ्गवचरणारविन्दचञ्चरीकायमानश्चतुरविजयो मुनिः ।
श्रीमज्जयविजयमुनिवर्यशिष्यरत्नश्रीमत्प्रतापविजयमुनिसमुपदिष्टदर्भावतीवास्तव्य शा. जेठालालखुशालचन्द्रेण स्वतातश्रेयोऽर्थं
वितीर्णवित्तसहायेन प्रकाशयित्री श्रीमदात्मानन्दजैनपाठशाला–दर्भावती (डभोई)
श्री " जैन एडवोकेट " मुद्रणालये–घीकांटावाडी–राजनगरे ( अमदावाद ) शा. गोकुलदासपुत्रचमनलालेन मुद्रितम्
वीर सं. २४४६. विक्रम सं. १९७६. आत्म सं. २५. प्रति ३४०.

अगण्यपुण्यकारुण्यधारिणो ब्रह्मचारिणः । जयन्तु विजयानन्दसूरयो गुणभूरयः ।

## ॥ निवेदनम् ॥

श्रीसंप्रतिक्षितिपतेर्वरपद्यबद्धं सम्यक्त्वपोषकमिदं भविनां चरित्रम् ।
नुन्नः प्रतापविजयेन मुनीश्वरेण हर्षादशोधयमहं लघुधीधरोऽपि ॥ १ ॥
आद्याविहास्ति यदि मङ्गलमस्वदोषं प्रान्ते प्रशस्तिरपि नो चरितस्य कर्तुः ।
निष्कासितं प्रतिधनेन कुतोऽपि केना-पीत्थं विकल्पनमिहाकरवं स्वचित्ते ॥ २ ॥
जीर्णं प्रतापविजयो मुनिरिद्धबुद्धि-र्दत्ते स्म शोधनविधौ निजपुस्तकं मे ।
सज्ज्ञानभानुरनिशं वृजिनान्धकार-हृत् प्रादुरस्तु हृदये विमलं वदस्य ॥ ३ ॥
श्रेष्ठिखुशालचन्द्राङ्गजन्मा श्रीमालिवंशजः डभोईपुरवास्तव्यो जेष्ठालालो विशुद्धधीः ॥ ४ ॥
स्वमातश्रेयसे द्रव्यसहाय्यं व्यतरन्मुदा एतन्मुद्रापणे तेन शतशः साधुवादभाक् ॥ ५ ॥
दृष्टोद्भवा याऽत्र भवेदशुद्धि-र्दृग्दोषजाता यदि वा ममापि ।
संशोधयिष्यन्ति बुधा विधाय कृपां मयि स्वच्छहृदो मुदा ताम् ॥ ६ ॥
रसाब्धिजिनसंख्ये(२४४६)ऽब्दे वीराद्दर्भावतीपुरि । निवेदनमलेखीदं चतुरेणालर्षमना ॥ ७ ॥

॥ श्रीमद्विजयानन्दसूरीश्वरक्रमकजेभ्यो नमः ॥

# ॥ श्रीमत्संप्रतिनृपतिचारित्रम् ॥

आसीदिहावसर्प्पिण्यां, चतुर्विंशो जिनेश्वरः । आत्तलोकातिगैश्वर्यः, श्रीवीरस्त्रिजगत्प्रभुः ॥ १ ॥ स्वामिना च सुधर्म्माख्यः, पञ्चमो गणभृद्वरः । भविष्यत्येष सन्तानी–त्यध्यास्यत निजे पदे ॥ २ ॥ शिष्यस्तस्याभवज्जम्बू–र्जाम्बूनदसमप्रभः । नादाच्छोभावि-वान्यस्य, केवलश्रियमाप्य यः ॥ ३ ॥ अजायत विनेयस्तद्–प्रभवः प्रभवः प्रभुः । व्रतेऽप्यभून्मनोहारी, नृणां शैली हि दुस्त्यजा ॥ ४ ॥ अन्तेवासी स तस्यासीद्, भट्टः शय्यंभवः पुनः । आतीर्थस्थायि यश्चक्रे, दशवैकालिकश्रुतम् ॥ ५ ॥ यशोभद्रो यशोभद्रः, सूरिस्तस्मा-दजायत । पुनस्ततोऽपि संभूतः, सम्भूत इति विश्रुतः ॥ ६ ॥ भद्रबाहुर्भद्रबाहु–र्मुख्योऽभूद्गणभृत्ततः । निर्युक्तयः कृता येन, श्रुतसद्मप्र-दीपिकाः ॥ ७ ॥ युगप्रधानतां भेजे, स्थूलभद्रस्ततः परम् । यस्तृणीकृतकन्दर्पः, पश्चिमः श्रुतकेवली ॥ ८ ॥ शिष्यौ बभूवतुस्तस्य, महागि-रिसुहस्तिनौ । निरस्ताऽशेषतमसौ, सूर्याचन्द्रमसाविव ॥ ९ ॥ पृथक् पृथग्गणं दत्वा, गुरुणा स्थापितावपि । गाढस्नेहौ सतीर्थ्यत्वा–दभूतां सहचारिणौ ॥ १० ॥ अन्यदा तौ विहारेण, कौशाम्बीं जग्मतुः पुरीम् । पुष्कलैकाश्रयालाभात्, तस्थतुः पृथगाश्रयौ ॥ ११ ॥ तदा च

१ सुवर्ण २ धर्मं यावत् । ३ तमः–पापं, पक्षे–तमोऽन्धकारः, । ४ विस्तीर्ण ।

वर्त्तते कालः, कालवद्दौस्थ्यभोजिनाम् । स्वप्नेऽपि दृश्यते यत्र, नाऽन्नलेशोऽपि तैः क्वचित् ॥ १२ ॥ साधुसङ्घाटकस्तत्र, भिक्षाहेतोः सुहस्तिनः । प्रविवेश धनाढ्यस्य, धनसार्थपतेर्गृहम् ॥ १३ ॥ अभ्युत्तस्थौ मुनी दृष्ट्वा, सहसा रभसाद्धनः । उदञ्चदुच्चरोमाञ्चः, प्रणंसीच्चातिभक्तितः ॥ १४ ॥ अथाऽऽदिशत् प्रियां सिंह–केसरादिकमद्भुतम् । आनयाऽऽहारसंभारं, येनैतौ प्रतिलाभये ॥ १५ ॥ तयाऽपि सर्वमानिन्ये, लब्धकल्पद्रुमादिव । अनिच्छद्भ्यामपि बलात्, तत्ताभ्यां सर्वमप्यदात् ॥१६॥ रङ्कः कश्चित्तदा तत्र, भिक्षार्थं तद्गृहाऽऽगतः । तद्दानग्रहणं दृष्ट्वा, चिन्तयामास विस्मितः ॥ १७ ॥ अहो धन्याः कृतार्थाश्च, जगत्यत्रैत एव हि । देवतामिव यानेवं, नमन्त्येवंविधा अपि ॥ १८ ॥ नूनं भिक्षुकताऽप्येषां, स्वर्गादप्यधिकायते। यदेवं प्रतिलाभ्यन्ते, खण्डखाद्यैः सुधातिगैः ॥ १९ ॥ दैन्यं प्रकाशयन्तोऽपि, नारका इव मादृशाः । नान्नलेशमपि क्वापि, लभन्ते तु कुतोऽपि हि ॥ २० ॥ दैन्यातिरेकाद्दत्ते चेत्, कोऽपि किञ्चित् कथञ्चन । तदप्युन्मिश्रमाक्रोशैः, कालकूटकणायितैः ॥ २१ ॥ साधुलब्धी ततः साधू, एतावेवाहमर्थये । दद्यातां यद्यमू किञ्चित्, कारुण्यात् करुणाधनौ ॥ २२ ॥ विमृश्यैवं ययाचेऽसौ, साधू तावप्यवोचताम् । भद्राऽऽवामस्य वाहीका–वेव स्वामी गुरुः पुनः ॥ २३ ॥ सोऽन्वगात् तौ ततोऽन्नार्थी, भक्तितोऽनुव्रजन्निव । दृष्ट्वाश्रयस्थितांश्चाऽग्रे, याचते स्म गुरूनपि ॥ २४ ॥ गुरुराख्यायि साधुभ्या–मावामप्यमुनाऽर्थितौ । श्रुतोपयोगं गुरव–स्ततस्तद्विषयं ददुः ॥ २५ ॥ महान् प्रवचनाधारो, नूनमेष भविष्यति । इति तेन परिज्ञाय, गुरवस्तं बभाषिरे ॥ २६ ॥ व्रतं गृह्णासि चेद्भद्र ! ततो दद्मस्तवेप्सितम् । स उवाच प्रभोऽस्त्वेवं, कः कल्याणं न वाञ्छति ॥२७॥ ततस्तदैव दीक्षित्वा, भोजनायोपवेशितः । भुक्तवानाकटीकण्ठ–माहारांस्तांस्तथाविधान् ॥२८॥ वातसंभृतभस्त्रेव, ततश्चास्फुरितोदरः । क्षणं शेते स्म मध्यान्हे, श्राद्धभुक्त इव द्विजः॥२९॥ अतिस्निग्धेऽतिमात्रे च, तत्राजीर्यत्यथाशने । शूलार्त्याऽश्व इवावेल्ल–ज्जातगूढविसूचिकः ॥ ३० ॥ ततो गुरुर्बभाषे तं, किं किञ्चिद्वत्स !

१ प्रणतवान् ।

भोक्ष्यसे ?। सोऽवदत् किं प्रभो स्यात् क्षुत्, कल्पद्रोरपि सन्निधौ ॥ ३१ ॥ सांप्रतं किञ्चिदं याचे, स्यातां चेत्त्वत्पदौ गतिः। इति जल्पन्नल्पार्त्तिः, प्रक्षीणायुर्व्यपद्यत ॥ ३२ ॥ सामायिकस्याऽव्यक्तस्य, प्रभावादुदपद्यत । रङ्कः सैष सुतो यस्य, सोऽन्वयस्तस्य कथ्यते ॥ ३३ ॥ इहाऽस्ति प्रथमद्वीपे, भरतक्षेत्रभूषणम् । फुल्लन्निःप्रतिमल्लश्री–गोल्लदेशः सुखैकभूः ॥ ३४ ॥ ग्रामोऽस्ति चणकग्राम–नामकस्तत्र विश्रुतः । बहुधान्यमनोहारी, गोरसाढ्यः सुकाव्यवत् ॥ ३५ ॥ चणीति ब्राह्मणस्तत्र, सच्चरित्रः पवित्रधीः । अर्हद्धर्म्मविशुद्धात्मा, श्रद्धालुः श्रावकोत्तमः ॥ ३६ ॥ प्राप्तोत्कर्षाणि हृद्ग्रामे, विद्यास्थानानि नित्यशः । चतुर्दशापि निर्बाधं, यस्यावात्सुः कुटुम्बवत् ॥ ३७ ॥ आगुस्तत्रान्यदाऽऽचार्याः, श्रुतसागरसूरयः । तद्गृहोपरिभूम्यां च, नृपास्थान्यामिव स्थिताः ॥ ३८ ॥ तदा च तत्र तत्कान्ता–ऽसूत सूनुं चणेश्वरी । प्ररूढदाढं प्रागेव, प्राचीवार्कं स्फुरत्प्रभम् ॥ ३९ ॥ कृत्वा जन्मोत्सवं तस्य, द्वादशे दिवसे ततः। चक्रे चाणिक्य इत्याख्या–मुत्सवेन महीयसा ॥ ४० ॥ ततश्चणी तनूजं तं, वन्दयित्वा गुरोः क्रमान्। दाढावृत्तान्तमाचख्यौ, पृच्छति स्म च तत्फलम् ॥४१॥ गुरवोऽतीन्द्रियज्ञान–समक्षसमयत्रयाः । आख्यन्नेष महाराजो, भविष्यति महामतिः ॥ ४२ ॥ अथ सोऽन्तर्गृहं गत्वा, दध्यौ सूनुर्ममापि किम् । कृत्वाऽनर्थावहं राज्यं, गमिष्यत्यधमां गतिम् ॥ ४३ ॥ ततः प्रघृष्य तद्दाढा–श्चणी वालकरश्मिना (?) । गुरोरावेदयामास, स्वरूपं तद्यथाकृतम् ॥ ४४ ॥ गुरुः प्रोवाच तं भद्र, किमिदं विदधे त्वया । यद्यथोपार्जितं येन, भोक्तव्यं तेन तत्तथा ॥४५॥ त्वया यद्यप्यघृष्यन्त, दाढाः सूनुस्तथाप्यसौ । बिम्बं किञ्चिद्विधायैव, राज्यं प्राज्यं करिष्यति ॥ ४६ ॥ अथ प्रवर्द्धमानः स, चाणिक्यस्त्यक्तशैशवः । विद्याः सर्वास्तदाचार्या–ल्लभ्यं धनमिवाददे ॥ ४७ ॥ अथानुरूपां पुत्रस्य, मृगाङ्कस्येव रोहिणीम् । विलोक्य ब्राह्मणीमेकां, चणी तं पर्यणाययत् ॥ ४८ ॥ ततः पितरि कालेन, क्रमात् कवलितेऽपि हि । सुधीर्वितृष्ण एवाऽस्था–द्धर्षास्विव सदैव सः ॥ ४९ ॥ अन्यदा दयिता तस्य, भ्रातुः परिणयोत्सवे ।

---

१ दाढायुक्तम्

ययौ पितृगृहं तस्या, जाम्योऽन्या अपि चाऽऽगमन् ॥ ५० ॥ तासां महेभ्यकान्ताना-मीयुषीणां महाश्रिया । मातापित्रादयः सर्वे, कुर्वन्त्य-
त्यन्तगौरवम् ॥ ५१ ॥ काचिदभ्यङ्गयन्त्यङ्ग-मुद्वर्त्तयति चापरा । काऽपि स्नपयति स्नेहा-द्विलेपयति काऽपि च ॥ ५२ ॥ काऽपि
संस्कुरुते पादौ, काऽप्याबध्नात्यलङ्कृतीः । वीजयन्ति च ताः काश्चि-दुपात्तैर्हस्तशाटकैः ॥ ५३ ॥ उपचारवचोभिश्च, सदाप्युल्लापयन्त्यपि ।
किं बहूक्तेन राज्ञीवत्, सर्वेऽप्याराधयन्ति ताः ॥ ५४ ॥ कार्यते कर्म दासीव, चाणिक्यस्य पुनः प्रिया । दरिद्रदयितेत्याप, सत्कृतिं न
कुतोऽपि सा ॥ ५५ ॥ विवाहानन्तरं ताश्च, दिव्यचीनांशुकादिभिः । सत्कृत्य सपरीवाराः, प्रेष्यन्ते स्म सगौरवम् ॥ ५६ ॥ दत्त्वा
चाणिक्यपत्न्यै च, वाससी गोणिविभ्रमे । गच्छेर्वत्सेऽध्वगैः सार्द्ध-मित्युक्त्वा प्रेषिता गृहात् ॥ ५७ ॥ ततः साऽचिन्तयद्धिग्धिग्, दारि-
द्र्यमपमानदम् । यत्र मातापितृभ्योऽपि, भवत्येवं पराभवः ॥ ५८ ॥ पराभवमिवोज्झंती, दृग्भ्यामश्रुमिषात्ततः । आजगाम गृहं पत्यु-र्नवा-
म्बुदसमानना ॥५९॥ प्रियः पप्रच्छ किं खिन्ने-वागताऽपि पितु-र्गृहात् । नोचे किञ्चित् पुनर्बाढं, पृष्टाऽऽख्यत्तं पराभवम् ॥६०॥ तच्छ्रुत्वा
सोऽपि सङ्क्रान्त-तत्खेदवदचिन्तयत् । अर्थ एव हि गौरव्यो, न कौलिन्यं न वा गुणाः ॥ ६१ ॥ कलावानपि राजाऽपि, न भाति क्षीण-
वैभवः । कुवेरोऽप्यकुलीनोऽपि, श्लाघ्यते धनवान् पुनः ॥ ६२ ॥ वित्ताढ्य एव सर्वत्र, प्रतिष्ठां लभते जने । काञ्चनश्रियमाबिभ्र-न्मेरुः
क्षितिभृतां धुरि ॥ ६३ ॥ सत्यां भवन्त्यसन्तोऽपि, यान्त्यां सन्तोऽपि यान्ति च । यया सार्द्धं गुणाः सर्वे, सा श्रीरेकैव नन्दतु ॥ ६४ ॥
अर्थश्चिन्तामणिरिव, चिन्तितार्थप्रसाधकः । तन्मयाऽप्यर्जनीयोऽसौ, तदेकमनसाऽधुना ॥ ६५ ॥ श्रुतश्च पाटलीपुत्रे, नन्दो विप्रसुवर्णदः ।
ततस्तं मार्गयामीति, ध्यात्वा तत्राशु सोऽगमत् ॥ ६६ ॥ प्राविशच्च नृपावासं, दैवात् केनाप्यवारितः । आक्रम्य राजवद्राज-सिंहासनमु-
पाविशत् ॥ ६७ ॥ इतः स्नातविलिप्ताङ्गः, सर्वालङ्कारभूषितः । नैमित्तिकभुजालम्बी, तत्रागान्नन्दभूपतिः ॥ ६८ ॥ पुरश्चाणिक्यमालोक्य,

१ भगिन्यः

नृपमूचे निमित्तवित् । देवायमेवमासीनो, धत्ते त्वद्वंशपर्शुताम् ॥६९॥ अरोषयद्भिस्तद्देव !, साम्ना च विनयेन च। असावुत्थापनीयोऽस्मा-ज्ज्वालितेन किमग्निना ॥ ७० ॥ राजादेशात्ततो दास्या, दत्तं तस्यान्यदासनम् । उक्तश्चैवमिहास्व त्वं, द्विजराजासनं त्यज ॥ ७१ ॥ सोऽथ दध्यौ न युक्तं त-द्यददत्तासनासनम् । अयुक्ततरमेतच्च, यदुत्थानं ततोऽपि हि ॥ ७२ ॥ विमृश्येति स तामूचे-ऽत्र मे स्थास्यति कुण्डिका । ततस्ताममुचत्तत्रा-न्यत्र न्यास्थत् त्रिदण्डकम् ॥ ७३ ॥ यज्ञोपवीतमन्यत्रे-त्यमुचद्यद्यदासनम् । रुरोध तत्तदन्यान्यै-रासनं स ग्रहात्तवत् ॥ ७४ ॥ धृष्टोऽयमिति राज्ञाऽथ, धृत्वा पद्भ्यामकर्ष्यत । सोऽपि भूमेरथोत्थाय, मत्याज्ञासीदिदं यथा ॥ ७५ ॥ कोषभृत्य-महामूलं, पुत्रमित्रादिशाखकम् । नन्दमुत्पाटयिष्येऽहं, महाद्रुममिवानिलः ॥ ७६ ॥ शिखां बध्ध्वा च चाणिक्य-स्ततोऽवोचद्रुषारुणः । संपूर्णायां प्रतिज्ञायां, शिखेयं छोटयिष्यते ॥ ७७ ॥ रोचते त्वत्पितुर्यत्तत्, कुर्यास्त्वमिति वादिनः । दत्त्वाऽर्द्धचन्द्रं[1] तं नन्द-पतयो निर-सारयन् ॥ ७८ ॥ स निर्यंश्च पुराद्दध्यौ, कषायविवशात्मकः । अज्ञानान्धस्तदाऽकार्षं, प्रतिज्ञां महतीं हहा ॥ ७९ ॥ तदियं पूरणीयैव, मर्त्तव्यमथवाऽऽहवे[2] । नोपहासास्पदैः स्थातुं, शक्यं जीवद्भिरन्यथा ॥ ८० ॥ तत्कथं स्यादिति ध्यातु-र्गुरुवाक्यं मनस्यभूत् । भविष्यत्येष चाणिक्यो, बिम्बान्तरितराज्यकृत् ॥ ८१ ॥ प्रतीच्यामप्युदेत्यंशु-र्विपर्यस्यति भूरपि । मेरोरपि चलेच्चूला, चलत्यार्षं वचस्तु न ॥ ८२ ॥ ततो बिम्बपरीक्षार्थं, परिव्राड्वेषमादधत् । मयूरपोषकग्रामं, नान्दं सोऽगात् परिभ्रमन् ॥ ८३ ॥ प्रविवेश च भिक्षार्थं, स महत्तरमन्दिरम् । उद्विग्नैस्तज्जनैः पृष्टो, भगवन् ! वेत्सि किञ्चन ॥ ८४ ॥ सोऽवदत् वेद्मि निःशेषं, तमथोचे महत्तरः । तर्हि पूरय मत्पुत्र्या-श्चन्द्रमःपानदोह-दम् ॥ ८५ ॥ यतः साऽस्ति तदप्राप्त्या, प्रस्थितेव यमालये । तदेनं पूरयन्नस्या-स्त्वं जीवातुर्भवाधुना ॥ ८६ ॥ अवतीर्णोऽस्ति गर्भेऽ-स्या, राज्यार्हः कोपि पूरुषः । ज्ञात्वेति दोहदात्तस्मा-च्चाणिक्यस्तमभाषत ॥ ८७ ॥ दोहदं पूरयाम्यस्या-श्चेद्गर्भं मे प्रयच्छत । प्रपन्नं तेन

१ गलहस्तकम् । २ युद्धे

तद्यस्मा–ज्जीवन्ती गर्भभृत् पुनः ॥ ८८ ॥ स ततः साक्षिणः कृत्वा–ऽकारयत् पटमण्डपम् । कृत्वा तस्योपरि च्छिद्रं, ज्योत्स्नां मूर्ध्नि स्थिते विधौ ॥ ८९ ॥ अधः सुधाधिकद्रव्य–संस्कृतक्षीरपूरितम् । स्थालं निवेश्य रन्ध्रान्तः–प्राप्तेन्दुप्रतिबिम्बभाक् ॥ ९० ॥ चाणिक्यस्तां सुता–मूचे, त्वत्कृते पुत्रि! चन्द्रमाः । आनीतोऽस्ति मया मन्त्रै–रत्राऽऽकृष्यैष तत्पिब ॥९१॥ चन्द्रं मत्वा च तं हर्षात्, पपौ साऽथ यथा यथा । तथा तथोपरि च्छिद्रं, प्यधत्तोर्ध्वस्थितः पुमान् ॥ ९२ ॥ गर्भो भाव्येष संपूर्णः, किं न वेति परीक्षितुम् । अर्द्धपीते स ऊचे ता–मियँल्लोकार्थम–स्त्विति ॥ ९३ ॥ तयोक्ते नेति सोऽवादीत्, पिब तर्ह्यन्यमत्र तां । लोकार्थमानयिष्यामी–त्येवं श्रद्धामपूरयत् ॥ ९४ ॥ अथोत्पादयितुं द्रव्यं, स धातुविवरेष्वगात् । धातुर्वादैश्च तत्प्राज्य–मुत्पाद्य पुनरागमत् ॥ ९५ ॥ ददर्श तत्र चाणिक्यः, सर्वलक्षणधारिणम् । क्रीडन्तं दारकं राज–नीत्या संवसथाद्बहिः ॥ ९६ ॥ पुरमालिख्य–निःशेषं, सदःसिंहासनासिनम् । प्राज्यैः परिवृतं डिम्भैः, सामन्तादिपदे कृतैः ॥९७॥ देशादीनां विलस (भ) न, कुर्वाणं दर्पमुद्धरं । दृष्ट्वा तुष्टः स चाणिक्य–स्तं परीक्षार्थमूचिवान् ॥ ९८ ॥ ममापि दीयतां किञ्चि–द्देवेत्या–कर्ण्य सोऽभ्यधात् । विप्रैतानि चरन्ति त्वं, गोकुलानि गृहाण भोः ॥ ९९ ॥ स स्माहैतान्यहं गृह्णन्, मार्ये गोस्वामिकैर्न किम् ? । स ऊचे किं न जानासि, वीरभोज्या वसुन्धरा ॥ १०० ॥ औदार्यशौर्यविज्ञानै–स्तं बालं स विदन्नपि ! कस्यायमिति पप्रच्छ, कश्चिड्डिम्भं स ऊचिवान् ॥ १०१ ॥ महत्तरस्य दौहित्र–श्चन्द्रगुप्तोऽयमाख्यया । गर्भस्थोऽप्येष निःशेषैः, परिव्राजकसात्कृतः ॥ १०२ ॥ ततो हर्षेण चाणिक्य–श्चन्द्रगुप्तमभाषत । आगच्छागच्छ भो वत्स !, यस्य त्वमसि सोऽस्म्यहम् ॥ १०३ ॥ करोमि सत्यं राजानं, क्रीडाराज्येन किं तव । इत्युक्त्वा तमुपादाय, चाणिक्यः स गतोऽन्यतः ॥ १०४ ॥ मेलयित्वा धनैस्तैश्च, चतुरङ्गं महद्बलम् । चन्द्रगुप्तं नृपं चक्रे, स्वयं मंत्री बभूव च ॥ १०५ ॥ सर्वौघेण ततो गत्वा–ऽवेष्टयन्नन्दपत्तनम् । कारागार इवाऽरौत्सीत्, तत्र धान्यादिकं विशत् ॥ १०६ ॥ नन्दोऽपि सर्वसामग्र्या, निःसृत्य नगराद्बहिः । मन्दराद्रिरिवाऽम्भोधिं, गाहयामास तद्बलम् ॥ १०७ ॥ नन्दसैन्यबलेनाथ, चन्द्रचाणिक्ययोश्चमूः ।

अभ्रावलीव वात्याभि–र्गता सर्वा दिशोदिशम् ॥ १०८ ॥ ततश्च चन्द्रचाणिक्या–वारुह्याऽश्वं पलायितौ । निवृत्य भेषवद्भूयः, प्रहर्त्तुं तौ
दिशैकया ॥ १०९ ॥ मा स्मोपलक्षयेत् कोऽपी–त्युज्झित्वा तुरगौ पथि । आरोहतां सरःपालीं, यातौ पादप्रचारतः ॥ ११० ॥ सादिनं
चैकमन्वाग–च्छन्तं दृष्ट्वा चणिप्रसूः । प्रक्षालयन्तं वासांसि, रजकं स्माह तीरगम् ॥ १११ ॥ अरेरे नश्य नश्य त्वं, भग्नो नन्दमहीपतिः ।
नन्दगृह्याः प्रगृह्यन्ते, चन्द्रगुप्तस्य सादिभिः ॥ ११२ ॥ तच्छ्रुत्वा स पलायिष्ट, चाणिक्यस्तत्पदे स्थितः । चन्द्रगुप्तस्तु नीरान्तः, स्थगितः
पद्मिनीवने ॥ ११३ ॥ स च सादी तदावादी–च्चाणिक्यं रजकायितम् । दृष्टौ किं चन्द्रचाणिक्यौ, यान्तावत्रेति सोऽभ्यधात् ॥ ११४ ॥
चाणिक्यो न मया दृष्ट–श्चन्द्रगुप्तस्तु तिष्ठति । निलीनः पद्मिनीषण्डे, तापाक्रान्तमरालवत् ॥ ११५ ॥ दृष्ट्वा साद्यपि तं स्माह, क्षणं बिभ्रहि
रे हयम् । तेनोच्यत बिभेम्यस्मा–त्तमाबध्यततस्तरौ ॥ ११६ ॥ जले प्रवेष्टुं मुक्तासि–र्यावन्मुञ्चति मोचके । तावत्तस्यैव खड्गेन, चाणिक्य-
स्तमसाधयत् ॥ ११७ ॥ पुनर्द्वावपि तस्याश्व–मथारुह्य पलायितौ । गत्वा च कियन्तीं भूमिं, तमपि प्रागिवोज्झताम् ॥ ११८ ॥ गच्छ-
न्नूचे च चाणिक्य–श्चन्द्रगुप्तमरे त्वया । किं तदा चिन्तयाञ्चक्रे, यदाऽशिक्षिषि सादिनम् ॥ ११९ ॥ चन्द्रगुप्तोऽवदत्तात !, तदैवं
चिन्तितं मया । मम साम्राजमार्येण, दृष्टमित्थं भविष्यति ॥ १२० ॥ तं निश्चिक्येऽथ चाणिक्यो, न मे व्यभिचरत्यसौ । मदुक्तमस्याऽनु-
ल्लंघ्यं, शिष्यस्य गुरुवाक्यवत् ॥ १२१ ॥ अथ क्षुधार्त्तं संस्थाप्य, चन्द्रगुप्तं वनान्तरे । चाणिक्यः प्राविशत् कश्चि–द्ग्राममन्नाय तत्कृते
॥ १२२ ॥ तिलकैष्टीकमानाङ्गं, नाशालग्नमहोदरम् । दृष्ट्वैकं विप्रमायान्तं, चाणिक्यः पृच्छति स्म तम् ॥ १२३ ॥ भोजनं लभ्यते क्वापि,
सोऽवदल्लभ्यते भृशम् । एतस्य यजमानस्य, गृहेऽद्यास्ति महोत्सवः ॥ १२४ ॥ सोऽपूर्वाणां विशेषेण, दत्ते दधिकरम्बकम् । व्रज त्वमपि
भुक्त्वाऽह–मप्यायातस्ततोऽधुना ॥ १२५ ॥ मा ज्ञासीन्नत्र मां कोऽपि, प्रविष्टं नन्दपूरुषः । मां विना चन्द्रगुप्तं च, कोऽपि मा स्म ग्रहीद्बहिः
॥ १२६ ॥ नन्दाश्ववारैर्दुर्वारैः, स चेद्राजः कथञ्चन । ततः सर्वस्वमोषान्मे, छिन्ना राज्यस्पृहालता ॥ १२७ ॥ एवं विचिन्त्य रक्षो–व

निःक्षुपः क्षुरिकाकरः । तस्योदरं विदार्याशु, चाणिक्यः पद्मकोषवत् ॥ १२८ ॥ अविनष्टं स्वरूपस्थं, स्थाल्या इव करम्बकम् । तमादाय पुटे कृत्वा गत्वा मौर्यमभोजयत् ॥१२९॥ युग्मम् ॥ पुनर्यान्तौ गतौ क्वापि, सन्निवेशे निशामुखे । चाणिक्यस्तत्र भिक्षार्थी, वृद्धाऽऽभीरीगृहं गतः ॥ १३० ॥ अत्राऽन्तरे स्वडिम्भानां, रब्बाऽत्युष्णा तया तदा । स्थाले दत्ताऽस्ति तन्मध्ये, न्यधादेकः शिशुः करम् ॥१३१॥ रुदन् दग्धकरः सोऽथ, तया साक्रोशमौच्यत । किं चाणिक्यस्य निर्बुद्धे-र्मिलितोऽसि त्वमप्यरे ॥ १३२ ॥ स्वनामाशङ्कयाऽपृच्छ-च्चाणिक्यः स्थविरां ततः । मातः क एष चाणिक्य-स्त्वं यदीयोपमामदाः ॥ १३३ ॥ तयोक्तं कोऽपि चाणिक्य-श्चन्द्रगुप्तनृपान्वितः । प्रागेव पाटलीपुत्र-मुपादातुमढौकत ॥ १३४ ॥ मूर्खो न वेत्ति यद्देशो, गृह्यते प्राक् समन्ततः । गृहीते च ततस्तस्मि-न्नात्तमेव हि पत्तनम् ॥ १३५ ॥ मत्पुत्रोऽप्येष तत्तुल्यः, पूर्वमेवाक्षिपत् करम् । मध्ये योऽत्युष्णरब्बाया, अनादायैव पार्श्वतः ॥ १३६ ॥ बालादपि हितं ग्राह्य-मिति नीतिं स्मरंस्ततः । स नन्दराज्यसंप्राप्ति-लग्नकं तद्वचोऽग्रहीत् ॥ १३७ ॥ सचन्द्रगुप्तश्चाणिक्यः, संवर्ग्य बलमात्मनः । गच्छति स्म ततः शैलं, हिमवत्कूटनामकम् ॥ १३८ ॥ शबराधिपतिं तत्र, चाणिक्यः पर्वताभिधम् । साहायकं ततः काङ्क्षन्, नयति स्म वयस्यताम् ॥ १३९ ॥ तमन्यदोचे चाणिक्यो, नन्दमून्मूल्य तच्छ्रियम् । आवां विभज्य गृह्णीवः, सोऽपि तत्प्रत्यपद्यत ॥१४०॥ सर्वौघेणाथ चाणिक्यः, स्वीकुर्वन्नन्दमेदिनीम् । एकं नन्दपुरं स्फीतं, वेष्टयामास सर्वतः ॥ १४१ ॥ शक्नोति तं न चादातुं, परिव्राड्वेषभाक् ततः । चाणिक्यः प्रविवेशान्तः-पुरं तद्वास्तु वीक्षितुम् ॥ १४२ ॥ अपश्यत् सुमतिष्ठाः स, भ्रमन्निन्द्रकुमारिकाः । दध्यौ चैतत्प्रभावेणा-ऽभङ्गमेतत्पुरं ध्रुवम् ॥ १४३ ॥ चणी तद्दृष्टमापृष्टः, स निर्विण्णैर्जनैस्तदा । आख्यदिन्द्रकुमारीणा-मासामुत्पाटने सति ॥ १४४ ॥ मयैतल्लक्षणैर्ज्ञातं, प्रत्ययश्चैष कथ्यते । एतदुत्पाटनारम्भे-ऽपीषद्रोधनिवर्त्तनम् ॥१४५॥ तथारब्धेऽपि तैस्तेन, रोधः किञ्चिन्न्यवर्त्त्यत । ततः प्रत्ययितैर्लोकै-स्तत्र कूपः कृतस्तदा ॥१४६॥

१ मेलयित्वा, २ देवमूर्त्तीः

ततस्तन्नगरं तत्र, गृहीत्वा भूरिवैभवम् । सर्वां परिधिमादाय, पाटलीपुत्रमाययौ ॥ १४७ ॥ ततस्तच्चन्द्रगुप्तस्य, पर्वतस्य च सैनिकैः । वेष्टितं सर्वतो दत्त-पोताऽऽवेष्टमिवाभवत् ॥ १४८ ॥ दर्पान्नन्दोऽपि निर्गत्य, निर्गत्य प्रतिवासरम् । महारणं प्रकुर्वाणः, क्षीयते स्म त्रुटद्बलः ॥ १४९ ॥ धर्मद्वारं ययाचेऽथ, हन्तकारमिव द्विजः । चाणिक्यस्तददौ तस्मै, नीतिरेषा हि भूभुजाम् ॥ १५० ॥ उपालम्भश्च नन्दस्य, चाणिक्येन प्रदापितः । त्वया न किञ्चिन्मे दत्त-मर्द्धचन्द्रं विना तदा ॥ १५१ ॥ दत्तं मयाऽधुना ते तु, जीवितं नन्द ! नन्द तत् । रथेनैकेन यद्याति, तदादाय च निस्सर ॥ १५२ ॥ नन्दो विषादमापन्नः, प्रक्षीणबलविक्रमः । दध्यौ धिग्धिक् श्रियं पापां, चञ्चलां चपलामिव ॥ १५३ ॥ अथ नन्दः कलत्रे द्वे, पुत्रीमेकां च वल्लभाम् । तथा साराणि साराणि, रथे रत्नान्यतिष्ठिपत् ॥ १५४ ॥ विषकन्यां पुनः पात्र-भूतामेकां गृहेऽमुचत् । चन्द्रगुप्तो विवाह्यैतां, म्रियतामिति चिन्तया ॥ १५५ ॥ सुवर्णरत्नमाणिक्य-वस्तु कुप्यादिकं पुनः । द्विषां किमपि भून्मेति, लात्वा सर्वं चचाल सः ॥ १५६ ॥ चन्द्रगुप्तं विशन्तं च, निर्यन्नन्दमियात्मजा । दृष्ट्वोद्गतं सूर्यमिव, विचकासाब्जिनीव सा ॥ १५७ ॥ ततस्तामूचिवान्नन्दः, पापे ! पश्यसि वैरिणम् । मम राज्यहरे रक्ता-तद्याहि भज वल्लभम् ॥ १५८ ॥ ततश्चन्द्ररथारोहे, तस्यास्त्यक्त्वा रथं पितुः । मन्दलक्ष्म्या इव भारा-द्भग्नाश्चक्रारका नव ॥ १५९॥ मन्वानोऽशकुनं चन्द्र-गुप्तस्तां विनिवारयन् । चाणिक्येनोचेऽतासौ ते, शकुनस्तन्निषेध मा ॥ १६० ॥ भग्नारकं भवद्राज्य मितो भावि नवाऽन्वयम् । ततस्तां रथमारोप्य, चन्द्रगुप्तोऽविशत् पुरम् ॥ १६१ ॥ नन्द ! पूर्णा प्रतिज्ञा मे, पश्येय छोटयते शिखा । इत्युक्त्वा पश्यतस्तस्य, चाणिक्योऽच्छोटयच्छिखाम् ॥ १६२ ॥ गच्छति स्म बहिर्नन्द-स्ते तु नन्दगृहं गताः । दृष्ट्वा कन्यां च तां चन्द्र-पर्वतावन्वरज्यताम् ॥ १६३ ॥ चाणिक्यो विषकन्यां तां, ज्ञात्वा चिह्नैस्ततोऽवदत् । चन्द्रगुप्त ! तवैकाऽभूत्, पर्वतस्यास्त्वसौ पुनः ॥ १६४ ॥ युवाभ्यां नन्दसाम्राज्यं, ग्राह्यं सर्वं विभज्य यत् । प्रारेभे पर्वतो

१ कथितम् ।

द्वाह–स्तदैवाथ तया सह ॥ १६५ ॥ तत्र मङ्गलतूर्याणि, प्रणदन्ति स्म विस्वरम् । ज्वलनो वादिकोतश्च, संहाराग्निरिवाऽज्वलत् ॥ १६६ ॥ लाजाञ्जलिश्च दैवज्ञो, जुहोति स्म स्खलन् स्खलन् । सुशोधितेऽपि लग्नेऽभू–द्भौमो नीचस्तनौ तदा ॥ १६७ ॥ लग्ने च लग्नवेलायां, सर्पवत्कन्यकाकरे । मूर्च्छितः शबराधीशो, विषाऽऽवेगेन तत्क्षणात् ॥१६८॥ भ्रात! भ्रात? श्चन्द्रगुप्त!, तात! चाणिक्य धीसख!। भ्रियते भ्रियते रक्ष, रक्षेत्यार्त्या जजल्प च ॥ १६९ ॥ चन्द्रगुप्तः प्रतीकारं, यावदारभतेऽस्य तु । तावद् भ्रकुटिमाबध्य, चाणिक्यस्तं न्यवारयत् ॥ १७० ॥ ऊचे चाद्यापि मुग्धोऽसि, नीतिं वेत्सि न भूपतेः । अर्द्धराज्यहरं मित्रं, यो न हन्यात् स हन्यते ॥ १७१ ॥ कालक्षेपमसतः सोऽपि, चक्रे व्यावर्त्तनादिभिः । अत्राणस्तुटितप्राण–स्ततः पर्वतको मृतः ॥ १७२ ॥ ततो राज्यद्वयेऽप्यासी–च्चन्द्रगुप्तः क्षितीश्वरः । चाणिक्यश्च महामन्त्री, राज्यनाटकसूत्रभृत् ॥ १७३ ॥ तदागमवरङ्गत्वात्, तत्र नन्दस्य पूरुषाः । सर्वे ते कुर्वते चौर्यं, दुर्द्धराः सिद्धविद्यवत् ॥ १७४ ॥ तद्रक्षार्थं तलारक्ष–मीक्षमाणस्ततः पुरे । वेषान्तरेण चाणिक्यः, सर्वत्रापि परिभ्रमन् ॥ १७५ ॥ कुर्विंदं नलदामाख्यं, वयंतं क्वाप्यवैक्षत । रममाणः सुतस्तस्य, दष्टो मत्कोटकैस्तदा ॥ १७६ ॥ रटन्नागत्य तस्याख्यत्, भक्षितो यमबन्धुना । खनित्वा तद्बिलं सद्यस्ते सर्वे भस्मसात्कृताः ॥ १७७ ॥ चाणिक्योऽपि हि योग्यो–ऽयमिति मत्वा गृहं गतः । तमाहूय तलारक्षं, चक्रे निस्त्रिंशशेखरम् ॥ १७८ ॥ तेनोक्तास्तस्कराः ! सैन्यं, कुरुत स्वेच्छयाऽधुना । जाते मयि तलारक्षे, समस्तं राज्यमात्मनः ॥ १७९ ॥ (?) इति विश्वास्य ते सर्वे, निमन्त्र्य सकुटुम्बकाः । द्वारं पिधाय भुञ्जानाः, कृताः प्रज्वाल्य भस्मसात् ॥ १८० ॥ ततः सौस्थ्यं पुरे तत्र, तथा जज्ञे यथा क्वचित् । चौरैः सहैव दग्धत्वा–च्चौर्यनाम्नोऽपि न श्रुतिः ॥ १८१ ॥ अथैकत्र पुरा ग्रामे, लब्धो भिक्षालवोऽपि न । चाणिक्येन ततस्तत्र, क्षुद्रादेशो व्यसृज्यत ॥ १८२ ॥ यथा चूताश्च वंशाश्च, ग्रामे तिष्ठन्ति वस्ततः । छित्त्वा चूतवनं वंश–वनस्य क्रियतां वृतिः ॥ १८३ ॥ दध्युर्ग्रामेयका-

१ तंतुवायमः ।

स्तेऽथ, न चूतैर्वंशरक्षणम् । घटते किन्तु वंशौघै-श्चूतानां परिरक्षणम् ॥१८४॥ परमार्थमजानानैः, स्वबुध्येति विमृश्य तैः। छित्वा वंशास्तत-
श्चूत-वनस्य वृतिरादधे ॥ १८५ ॥ तमादेशविपर्यासं, मिषीकृत्य चणीप्रभूः । मदान्ध इव कुम्भीन्द्रः, कृत्याकृत्यमचिन्तयन् ॥ १०६ ॥
सबालवृद्धं तं ग्रामं, बध्वा द्वाराणि सर्वतः । द्वीपायनो द्वारवती-मिव प्राज्वालयत् क्रुधा ॥ १८७ ॥ युग्मम् ॥ अथानिनाय तां भार्यां-
मूचे च दयिते ! मया । त्वत्कृते विहितः सर्वः, साम्राज्यार्थमुपक्रमः ॥ १८८ ॥ अपमानविषार्त्तिं ता-मैश्वर्यसुधयाऽधुना । तन्निवर्त्त्य महा-
भागे ! शचीवानुभवेः सुखम् ॥ १८९ ॥ चाणिक्यचरितं चैत-दाकर्ण्य श्वशुरोऽपि हि । भीतो भीतः समागत्य, चाणिक्यमिदमूचिवान्
॥ १९० ॥ जामातः ! प्राग् यदस्माभिः, पुत्रोद्वाहे भवत्प्रिया । दयिता निर्धनस्येति, स्वपुत्र्यपि न सत्कृता ॥१९१॥ स तवैव तिरस्कार-
स्तत्त्वतोऽस्माभिरा[illegible] । क्षम्यतामेकदाऽस्माक-मपराधः प्रसद्य भोः ॥ १९२ ॥ चाणिक्योऽप्यभवत्तस्य, सुप्रसन्नमनास्ततः । जायन्ते हि
महीयांसः, प्रणिपातव[illegible]ाः ॥ १९३ ॥ श्वशुरस्यापरेषां च, स्वजनानां ततोमुदा । स ददौ ग्रामदेशादी-नौचित्यादौचितीचणः ॥१९४॥
अन्यदाऽऽलोकयन् को[illegible]शं, शून्यं दुर्गतवेश्मवत् । दध्यौ च न भवेद्राज्यं, कोशहीनं विनंक्ष्यति ॥ १९५ ॥ अथ कोषकृतेऽकार्षी-च्चाणिक्यः
कूटपाशकान् । रत्नस्थालं पुरस्कृत्य, स्वनरं रन्तुमासयत् ॥ १९६ ॥ सोऽवदद्येन जीयेऽहं, रत्नस्थालस्य स प्रभुः। दद्यादेकं स दीनारं, यः
पुनर्जीयते मया ॥ १९७ ॥ रमन्ते बहवस्तेन, सार्द्धं लोभेन किं पुनः । जीयते न स केनापि, स्ववशंवदपाशकः ॥ १९८ ॥ चाणिक्ये-
नाथ विज्ञाय, कोशपूर्त्तिश्चिरादितः । उपायान्तरमास्थ्त्रि, शीघ्रं कोशप्रदं ततः ॥ १९९ ॥ पाययामि यथा मद्यं, सर्वानपि कुटुम्बिनः ।
गृहसारं निजं येन, सर्वमावेदयन्ति ते ॥२००॥ यतः क्रुद्धस्य रक्तस्य, व्यसनाऽऽपतितस्य च। मत्तस्य म्रियमाणस्य, सद्भावः प्रकटो भवेत्
॥ २०१ ॥ इति निश्चित्य चाणिक्यः, समाहूय कुटुम्बिनः । मद्येन मदयित्वा तान्, सद्भावं ज्ञातुमूचिवान् ॥ २०२ ॥ द्वे वस्त्रे धातुरक्ते मे,

---

१ गुरवः ।

त्रिदण्डं स्वर्णकुण्डिका । वर्त्तते च वशे राजा, होलां वादयतात्र मे ॥ २०३ ॥ तच्चाणिक्योक्तमाकर्ण्य, ते सर्वेऽपि कुटुम्बिनः । गर्वतः स्व-
स्वसर्वस्व–मेकैकानुष्टुभाऽभ्यधुः ॥२०४॥ सहस्रयोजनं मार्गं, गच्छतो मत्तदन्तिनः । पदे पदे वित्तलक्षं, होलां वादयतादत्र मे ॥ २०५॥
तिलाढकस्य मुप्तस्य, सुनिष्पत्तिं गतस्य च । तिले तिले वित्तलक्षं, होलां वादयतात्र मे ॥ २०६ ॥ नद्याः प्रावृषि पूरेण, वहन्त्याः पालि-
बन्धनम् । एकाहम्रक्षणैः कुर्वे, होलां वादयतात्र मे ॥ २०७ ॥ जात्यानां च किशोराणा–मेकाहप्राप्तजन्मनाम् । छादयाम्यंशकेशैर्द्यौ, होलां
वादयतात्र मे ॥ २०८ ॥ शालिप्रसूति[२] गर्दभ्यौ, द्वे रत्ने मम तिष्ठतः । छिन्नछिन्नरुहे नित्यं, होलां वादयताऽत्र मे ॥२०९॥ अप्रवासी
वश्यभार्यः, सहस्रद्रविणोऽनृणः । शुक्लवासाः सुगन्धाङ्गो, होलां वादयतात्र मे ॥ २१० ॥ एवं विज्ञाय तद्भावं, ते चाणिक्येन निर्मदाः ।
आढ्या धनममार्ग्यन्त, यथौचित्येन धीमता ॥ २११ ॥ एकयोजनगामीभ–पदमित्याऽर्थलक्षकाः । तथैकतिलजतिल–मितान् शतसहस्रकान्
॥ २१२ ॥ एकाहम्रक्षणाज्यं चै–काहाश्वान्मासि मासि च । कोष्ठागारभृतः शालीं–श्चाणिक्याय ददुश्च ते ॥ २१३ ॥ एवं संपूर्य कोशौ-
घान्, कोष्ठागाराणि निर्वृतः । चाणिक्यः कृतकर्त्तव्यो, राज्यं राजेव शास्ति सः ॥ २१४ ॥ हारेणेव विहारेण, स्फुरन्मुक्तानुषङ्गिणा । तत्र
प्रसाधयन्तः क्ष्मा–मीयुर्विजयसूरयः ॥ २१५ ॥ क्षीणजङ्घाबलास्ते च, वृद्धावासं चिकीर्षवः । ज्ञात्वा च भाविदुर्भिक्षं, शैक्षमात्मपदे, व्यधुः
॥ २१६ ॥ विद्यायतिशयांस्तस्य, रहस्याख्यन्मिथीनिव । गच्छं समर्प्य प्राहैषुः, सुभिक्षभूति नीवृति ॥ २१७ ॥ गुरुस्नेहानुरागेण, कृत्वा
तद्दृष्टिवञ्चनम् क्षुल्लकद्वितयं त्वागा–न्निवृत्त्य गुरुसन्निधौ ॥ २१८ ॥ गुरुणाऽभिहितौ वत्सौ:! युक्तं नैतदनुष्ठितम् । पतिष्यत्यत्र दुष्कालः,
करालः कालसोदरः ॥२१९॥ ऊचे ताभ्यां न नौ तत्र, प्रतिभाति प्रभून् विना । तदत्रावां सहिष्यावः, सर्वं पूज्याऽन्तिके स्थितौ ॥२२०॥
एवं च सति तत्रागाद्, दुर्भिक्षं द्वादशाब्दकम् । कृतान्तस्य कृतोत्साहं, दानधर्मस्य मान्द्यकृत् ॥ २२१ ॥ यत्रान्नमुदरे रत्न–निधावं

१ आकाशं । २ श्वेतवनस्पती । ३ करोति । ४ अलंकुर्वन्त । ५ देशे ।

यत्राऽसमुदरे रत्न–निधायं विनिधीयते । सर्वैः परस्परं लोकै–र्नित्यं कस्याप्यपश्यतः ॥२२२॥ तदा दुर्भिक्षराजेन, वाञ्छतैकातपत्रताम् । रङ्कराजा न्ययोज्यन्त, निजमाण्डलिका इव ॥२२३॥ उत्तिष्ठन्त्युपविष्टाश्च, न भिक्षाका गृहे गृहे ॥ दुःकालक्षितिपालस्य, भट्टपुत्रा इवोत्कटाः ॥२२४॥ एवं विधे च काले य–त्सुभन्ते गुरवः क्वचित् । भव्यं भैक्ष्यं तयोस्तत्त–द्यच्छन्ति प्रतिबन्धतः ॥ २२५ ॥ क्षुल्लकाभ्यां ततोऽचिन्ति विभात्येतन्न सुन्दरम् । यतो गुरुषु सीदत्सु, का गतिर्नौ भविष्यति ॥ २२६ ॥ कुलं येन सनाथं स, पुमान् यत्नेन रक्ष्यते । तारकाः स्युः किमाधारा–स्तुम्बे नाशमुपेयुषि ॥ २२७ ॥ चलद्दन्ते गतमदे, जराजर्जरितेऽपि च । सनाथं सर्वथा नूनं, यूथं यूथपतौ सति ॥ २२८ ॥ तत्पूज्यैर्नव्यसूरीणां, दीयमानस्तदा निशि । श्रुतोऽस्त्यञ्जनयोगो यः, कुर्वस्तमिह संप्रति ॥ २२९ ॥ इत्यालोच्य कृतस्ताभ्यां, योगः सिद्धश्च तेन च । भूत्वाऽदृश्यौ गतौ चन्द्र–गुप्तेन सह जेमितुम् ॥ २३० ॥ तमालोक्य च भुञ्जानं, पार्श्वयोरुपविश्य च । भुक्त्वा यातौ तथैवाथ, भुञ्जाते ते दिने दिने ॥२३१॥ राजाऽन्यदिनमानेन, भुंक्ते भुक्तोज्झते सति । अजीर्णभयतो वैद्यैः, सपद्युत्थाप्यते स्म सः ॥२३२॥ एवं चैकस्य भोज्यार्हे, भुज्यमानैर्जनैस्त्रिभिः । अतृप्यन् कृशतां याति, राजा वक्ति ह्रिया न च ॥ २३३ ॥ कृष्णपक्षेन्दुवच्चन्द्र–गुप्तं कार्श्यजुषं ततः । पप्रच्छ चणिसूर्वत्स !, दुःकालः किं तवाऽपि हि ॥२३४॥ स ऊचे नाऽऽर्य! तृप्यामि, चाणिक्योऽचिन्तयत्ततः । अव्यक्तः कोऽपि सिद्धोऽस्या–ऽऽहारं हरति निश्चितम् ॥ २३५ ॥ द्वितीयेऽन्हीष्टिकश्चूर्णः, कीर्णो भोजनमण्डपे । द्वयोर्बालकयोस्तत्र, पदपङ्क्तिस्ततोऽभवत् ॥ २३६ ॥ निश्चिकाय तया मन्त्री, नूनं सिद्धाञ्जनाविमौ । द्वारं बध्वा ततस्तत्र, सद्यो धूममकारयत् ॥ २३७ ॥ धूमेन गलतोरक्ष्णो–रश्रुभिः क्षालितेऽञ्जने । दृष्टौ नृपस्य पार्श्वस्थौ, भुञ्जानौ क्षुल्लकावुभौ ॥ २३८ ॥ आभ्यां विटालितोऽस्मीति, राजाऽभूद् दुर्मना मनाक् । मा भूच्छासनहीलेति, तमेनं स्माह धीसखः ॥२३९॥ कालुष्यं वत्स! किं धत्से, शुद्धिरद्यैव तेऽभवत् । यद्बालयतिभिः सार्द्धं, भुक्तोऽस्येकत्र

---

1 मोहात्

भाजने ॥ २४० ॥ कः साधुभिः समं भोक्तु-मेकत्र लभते गृही । ततस्त्वमेव पुण्यात्मा, सुलब्धं जीवितं च ते ॥२४१॥ न द्रष्टुमपि लभ्यन्ते, भुञ्जाना ये महर्षयः । तैः समं भोजनादस्य, श्लाघनीयोऽसि कस्य न ॥२४२॥ एते हि त्रिजगद्वन्द्याः, कुमारब्रह्मचारिणः । एतत्पादरजोऽपीह, पावनेभ्योऽपि पावनम् ॥२४३॥ चन्द्रगुप्तं प्रबोध्यैवं, क्षुल्लकौ तौ विसृज्य च । चाणिक्योऽप्यनु तत्रागा-दुपालम्भं ददौ गुरोः ॥२४४॥ प्रभो ! भवद्विनेयाव-प्येवं यत्कुरुतस्ततः । अन्यत्र कुत्र चारित्रं, पवित्रं प्राप्स्यतेऽधुना ॥ २४५ ॥ गुरुणा भणितः सोऽथ, चाणिक्य ! श्रावको भवान् । मोदिष्यते त्वया स्वस्थः, स श्रावकचणश्रणी ॥ २४६ ॥ प्राप्तोत्कर्षेऽपि दुःकाले, प्राप्तोत्कर्षे च वैभवे । तत्रैदक्षान्महादानाद्, भवाम्भोधिर्न दुस्तरः ॥ २४७ ॥ अत एवाखिलो गच्छः, प्रैषि देशान्तरं मया । त्वादृशं श्रावकमिह, मत्वा कल्पद्रुमायितम् ॥ ॥ २४८ ॥ क्षुल्लकद्वयमप्येत-द्यदेवं वर्त्तते मम । श्रावकस्य प्रसिद्धिस्ते, भविष्यति महीयसी ॥ २४९ ॥ शिष्यावपि गुरुः स्माह, युवाभ्यां किमहो कृतम् । त्याज्यो हि साधुभिर्नात्मा, महत्यपि परीषहे ॥ २५० ॥ करिणः करिसङ्कट्टे, निष्कस्य कषपट्टके । व्यसने सात्विकानां च, सारत्वं ज्ञायते खलु ॥२५१॥ क्षमयामासतुः शिष्यौ, ततः स्वागः प्रणम्य तौ । करिष्यावः पुनर्नैवं, प्रभो ! मिथ्याऽस्तु दुष्कृतम् ॥२५२॥ चाणिक्योऽप्येतदाकर्ण्य, लज्जितो गुरुमूचिवान् । प्रभोऽनुशास्तिनावाऽहं, भवाम्भोधेस्त्वयोद्धृतः ॥२५३॥ इतः प्रभृति मद्गेहे, विशुद्धैरशनादिभिः । अनुग्रहः सदा कार्यो, निस्तार्योऽहं प्रमद्वरः ॥ २५४ ॥ इयन्त्यहानि भक्ताद्यै-रुपष्टम्भः कृतो न यत् । तन्मे प्रसद्य शिष्याणोः, क्षमणीयं क्षमाधनैः ॥ २५५ ॥ इत्युक्त्वा गुरुमानम्य, चाणिक्यो जग्मिवान् गृहम् । क्षुल्लकावपि तद्गेहे-ऽन्नाद्यं जगृहतुः सुखम् ॥ २५६ ॥ ज्ञात्वाऽन्येद्युश्चन्द्रगुप्तं, मिथ्यादृष्टिप्रतारितम् । स्वपितेव प्रियाकर्त्तु-मन्वशात्तं चणीप्रसूः ॥ २५७ ॥ अमी पाखण्डिनो वत्स ! जीविकार्थं धृतव्रताः । दुःशीला निःकृपाः पापा, नामाऽप्येषां न गृह्यते ॥ २५८ ॥ छायाऽप्येषां परित्याज्या, बिभीतकतरोरिव ।

१ धुर्यः । २ शिक्षानौकया ।

एतत्पूजादिवार्त्ता तु, श्रुत्योस्तप्तत्रपूयते ॥ २५९ ॥ कषायविषयाराति–राजधानीष्वधर्म्मिषु । भस्मनीव हुतं वत्स, दानमेतेषु जायते ॥ ॥२६०॥ एते स्वं च स्वभक्तं च, मूर्खनिर्यामका इव । पातयन्ति भवाम्भोधौ, तदेतांस्त्यज पापवत् ॥२६१॥ तच्छ्रुत्वा स्माह मौर्योऽपि, त्वद्गीर्मे मस्तकोपरि । परमीदृक्क्रियैषां व–स्ततोऽध्यक्षाऽथवा श्रुता ॥ २६२ ॥ चाणिक्यः स्माह दुर्वृत्त–मेषां मे सर्वदा स्फुटम् । त्वामपि ज्ञापयिष्यामि, प्रत्यक्षीकृत्य तत्तथा ॥ २६३ ॥ आजूहवदथाऽन्येद्यु–र्मन्त्री पाखण्डिनोऽखिलान् । आत्मीयात्मीयधर्मस्य, कथनाय नृपाग्रतः ॥ २६४ ॥ विजनेऽन्तःपुरासन्ने, स्थानेऽध्यासयति स्म तान् । तत्र चाऽक्षेपयल्लोष्ट–चूर्णं प्राक् सुसमं सुधीः ॥२६५॥ यावद्राजागमं ते च, सर्वेऽप्यविजितेन्द्रियाः । उत्थाय जालिकद्वारै–रैक्षन्त नृपवल्लभाः ॥२६६॥ दृष्ट्वा च नृपमायान्तं, धृत्वा मुद्रामुपाविशन् । स्वं स्वं धर्ममथाख्याय, राज्ञो जग्मुर्यथागतम् ॥ २६७ ॥ चाणिक्योऽथ नरेन्द्रस्य, लोष्टचूर्णोपरि प्रधीः । तत्पादप्रतिबिम्बानि, तत्र तत्र प्रदर्शयन् ॥ २६८ ॥ उवाच पश्य स्त्रीलोला, एते यावत्त्वदागमम् । अन्तःपुरं तवैक्षन्त, स्थित्वा स्थित्वोपजालिकम् ॥ २६९ ॥ चन्द्रगुप्तोऽपि तद्दृष्ट्वा, तेषां दौःशील्यचेष्टितम् । विरक्तिमगमत् सद्यः, सत्यलीकाङ्गनास्विव ॥ २७० ॥ लोष्टचूर्णं समीकृत्य, तत्तत्रैव सिताम्बरान् । अध्यासयद् द्वितीयेऽन्हि, तथैवाऽऽहूय धीसखः ॥ २७१ ॥ ध्यानमौनपरास्तेऽपि, मुनीन्द्राः स्वीयमुद्रया । जितेन्द्रियतया तस्थुः, स्थानस्था एव बिम्बवत् ॥ २७२ ॥ आगतस्य च भूभर्तु–र्धर्ममाख्याय तेऽप्यगुः । ईर्यासमितिसंलीनाः, साम्यवासितचेतसः ॥ २७३ ॥ चाणिक्योऽथाऽब्रवीचन्द्र–गुप्तं पश्य महीपते ! । पदान्येषां मुनीन्द्राणां, दृश्यन्ते नात्र कुत्रचित् ॥२७४॥ नामी प्रेक्षन्त ते स्त्रैण–मत्रागत्य जितेन्द्रियाः । स्त्रैणे हि तृणधीरेषां, सिद्धिश्रीसङ्गमार्थिनाम् ॥ २७५ ॥ सुसाधुषु दृढा भक्ति–श्चन्द्रगुप्तस्ततः परम् । दृष्टशुद्धसमाचारः, संजज्ञे परमार्हतः ॥ २७६ ॥ चाणिक्योऽन्येद्युरादध्यौ, कश्चित्तौ क्षुल्लकाविव । यद्यदृष्यो विषं राज्ञे, दद्यात् तत् स्यान्न शोभनम् ॥ २७७ ॥ विमृश्येति स

राजानं, विषमिश्रितमोदनम् । सहमानं सहमानं, भोजयामास नित्यशः ॥ २७८ ॥ राज्ञश्चाऽस्ति महादेवी, धारिणी गर्भधारिणी । तस्याः
समं नृपेणैक–स्थालेऽभूद् भुक्तिदोहदः ॥२७९॥ साऽथाऽभूत्तदसंपत्तौ, चन्द्रलेखेव दुर्बला । विलोक्य तादृशीं तां च, पृच्छति स्म महीपतिः
॥२८०॥ किं ते न पूर्यते किञ्चित्, किंवाऽऽज्ञां कोऽप्यखण्डयत् । किं केनाऽप्यभिभूता वा, यदेवं देवि ! दुर्बला ॥२८१॥ साऽवादीन्नैक-
कोऽप्येषां, हेतुः कोऽप्यस्ति किं पुनः । त्वया सहैकस्थाले मे, भोक्तुं देवाऽस्ति दोहदः ॥२८२॥ राज्ञोचे देवि! विश्वस्ता, भव श्वः पूरयिष्यते।
सह भोक्तुं द्वितीयेऽन्हि, तामथाजूहवन्नृपः ॥२८३॥ चाणिक्यः स्माह मा दास्त्वं, वत्स राज्ञ्यै स्वभोजनम् । यतस्तवाऽयमाहारः, सर्वोऽस्ति
विषभावितः ॥ २८४ ॥ ततो दिने दिनेऽप्यस्यां, मार्गयन्त्यां नृपोऽन्यदा । अनागच्छति चाणिक्ये, ददौ कवलमेककम् ॥ २८५ ॥
तं यावदत्ति सा देवी, चाणिक्यस्तावदागतः । दृष्ट्वा च स्वादयन्तीं ता–माः किं चक्रे स्ववैरिणी ॥ २८६ ॥ सर्वनाशे समुत्पन्ने, अर्द्धं
त्यजति पण्डितः । द्वयोः प्राप्ते विषान्मृत्यौ, जीवयाम्यहमेककम् ॥ २८७ ॥ जल्पन्नित्युदरं तस्या, विदार्य क्षुरिकाकरः । रोहणोर्व्या रत्न-
मिव, पुत्ररत्नं तदाऽकृषत् ॥ २८८ ॥ कृत्वा घृतादिमध्ये तं, दिनान्यूनान्यपूरयत् । तज्जनन्याश्च धारिण्या, मृतकार्यमकारयत् ॥ २८९ ॥
तमश्नन्त्याश्च मातुस्त–द्बिन्दुर्मूर्ध्न्यपतच्छिशोः । नोदगुस्तत्प्रदेशेऽथ, केशाः शस्यमिवोषरे ॥ २९० ॥ अत एवाभिधां तस्य, बिन्दुसार
इति व्यधुः । वर्द्धमानोऽथ सोऽधीयान् (?), शशीवाऽभूत् कलामयः ॥ २९१ ॥ अन्यदोपरते राज्ञि, बिन्दुसारोऽभवन्नृपः । ववृधेऽथ
प्रतापेन, निदाघार्के इवाग्निशम् ॥ २९२ ॥ शिष्यमाणो मुहुः सोऽपि, धात्र्या मात्रेव नित्यशः । आराधयति चाणिक्यं, चन्द्रगुप्त
इवापरः ॥ २९३ ॥ सुबन्धुनान्यदैकान्ते, राजोचे नन्दमन्त्रिणा । अस्थापितोऽपि मन्त्रित्वे, देव ! किञ्चित् करोम्यहम् ॥ २९४ ॥
यद्यप्यस्मद्गिरः स्वामि–न्नार्घन्त्यत्र तथापि हि । पट्टस्यास्य हितं वक्तुं, जिव्हा कण्डूयते मम ॥ २९५ ॥ य एष देव ! चाणिक्यो, मन्त्री-
शोऽस्त्यतिदारुणः । विदार्योदरमेतेन, भवन्माताऽप्यमार्यत ॥२९६॥ ततः स्वात्माऽपि यत्नेन, रक्षणीयस्त्वया नृप ! । सोऽथ पप्रच्छ तद्धात्रीं, 

साऽप्यवादीदभूदिदम् ॥ २९७ ततः क्रुद्धः स चाणिक्ये-न प्रायासीत् पराङ्मुखः। खलप्रवेशं विज्ञाय, चाणिक्योऽपि गृहं गतः ॥ २९८॥ अलं प्रत्याख्य पृथुकं, किमारब्धेन मेऽधुना। अवश्यमेव मर्तव्ये, मर्तव्यं किमशम्बलैः ॥ २९९ ॥ इति ध्यात्वा परित्यज्य, राज्यकाङ्क्षां निजं धनम्। चाणिक्येनौप्यताशेषं, सप्तक्षेत्र्यां सुबीजवत् ॥ ३०० ॥ अथेष्टस्वजनादीना-मौचित्येनोपकृत्य च। अनाथदीनदुःस्थानां, दानं दत्वाऽनुकम्पया ॥ ३०१ ॥ विचार्य वर्यया बुद्ध्या, प्रतिकारक्षमं रिपोः। पत्रकं गन्धचूर्णं च, मध्यान्मध्ये निधाय च ॥ ३०२ ॥ गत्वा बहिःकरीषान्तः, संस्थानस्थण्डिलेन वा। विधायानशनं तस्था--विङ्गिनीमरणेच्छया ॥ ३०३ ॥ तच्चाकर्ण्य नृपो धात्र्या--ऽभ्यधायि ननु वत्स ! किम्। अवज्ञातो महामात्यः, प्राणदो राज्यदश्च ते ॥ ३०४ ॥ तत्सर्वं तन्मुखाच्छ्रुत्वा, स्वरूपं भूपतिस्तदा। तत्र गत्वा पदो-लग्न--श्चाणिक्यं स्माह भक्तिमान् ॥ ३०५ ॥ अज्ञानेनाऽस्यवज्ञात--स्तात मा मां ततस्त्यज। पुरीषमुत्सृजत्यङ्के, डिम्भश्चेत्त्यज्यते स किम् ? ॥ ३०६ ॥ तत्प्रसीद गृहाणेहि। शाधि साम्राज्यमात्मनः। स ऊचे वत्स पर्याप्तं, यत्संप्रत्यनशन्यहम् ॥ ३०७॥ ततो राजा वलित्वाऽगा-द्धृतसर्वस्ववद्रुदन्। हाऽभूवमकृतज्ञोऽह-मिति स्वं हीलयन्मुहुः ॥ ३०८ ॥ दध्यौ सुबन्धुर्यद्येष, कथञ्चन निवर्तते। समूलकाषं मद्वर्गं, कषत्येव ध्रुवं ततः ॥ ३०९ ॥ विचिन्त्येति ततः साश्रु-र्नृपमूचे सगद्गदम्। देवाविमृश्यकृत्त्वेना-नर्थोऽभूदेष दैवतः ॥ ३१० ॥ देवाज्ञया तदेतर्हि, साम्यनिर्मग्नचेतसः। चाणिक्यस्य सपर्यार्ग्रै-र्भवाद्वृद्धिं करोम्यहम् ॥ ३११॥ ततो राजानुमत्या स, सन्ध्या-यामेत्य दाम्भिकः। कृत्वाऽर्चां न्यस्य चोपान्तं, धूपाङ्गारं गतः कुधीः ॥ ३१२॥ चाणिक्योप्यग्निना तेन, तप्यमानो महामनाः। भावनां भावयामास, दुष्कर्मग्रसनोरगीम् ॥ ३१३॥ अमेध्यमूत्रप्रस्वेद-मलदौर्गन्ध्यपिच्छले। रे जीवाऽतीवबीभत्से, वपुषि प्रेम मा कृथाः ॥ ३१४॥ द्वे एव पुण्यपापाख्ये, जीवेन सह गच्छतः। कृतघ्नं वपुरेतत्तु, किञ्चिन्नानुव्रजत्यपि ॥ ३१५॥ याः सोढा नरके पूर्व-मत्युग्रा वेदनास्त्वया। ता-

१ वालं. २ सेवा.

सामसौ न लक्षांशे–ऽप्याग्नेयी वेदनाऽस्ति ते ॥३१६॥ अन्वभूयंत तिर्यक्त्वे, यास्त्वयाऽनेकशः पुरा। ताः साक्षादिव तिर्यक्षु, पश्यन् पीडां सहाऽग्निजाम् ॥ ३१७ ॥ मनुष्यः प्राप्तधर्मा च, यावज्जीवसि जीव हे। प्रस्थानस्थोऽत्र सुमना–स्तावदर्हद्वचः स्मर ॥ ३१८ ॥ एक उत्पद्यते जीवो, म्रियतेऽप्येक एवहि। संसारेऽपि भ्रमत्येकः, प्राप्नोत्येकश्च निर्वृतिम् ॥ ३१९ ॥ ज्ञानश्रद्धानचारित्रा– ण्येवाहं श्रद्धेऽधुना। यावज्जीवमितः सर्वे, व्युत्सृष्टा भवदोहदाः॥३२०॥ मया हिंसामृषावाद–स्तेयाब्रह्मपरिग्रहाः। चतुर्विधोऽपि चाहारः, प्रत्याख्यातस्त्रिधाऽधुना ३२१ ॥ क्षमयामि सर्वजीवान्, सर्वे क्षाम्यन्तु ते मयि। मैत्री मे सर्वजीवेषु, वैरं मम न केनचित् ॥ ३२२ ॥ यान्मे जानन्ति सर्वज्ञा, अपराधाननेकधा। आलोचयामि सर्वांस्तान्, साक्षीकृत्यार्हतादिकान् ॥ ३२३ ॥ छद्मस्थो मूढचित्तो य– ज्जीवः स्मरति वा न वा। मत्यक्षात्तत्र सर्वत्र–दानीं मिथ्याऽस्तु दुष्कृतम् ॥ ३२४ ॥ एवं स्वदुष्कृतं निन्दन् सुकृतं चानुमोदयन्। सिद्धिसोपानदेशीयं, चतुःशरणमाश्रितः ॥ ३२५ ॥ सिद्धसाक्षिकमालोच्य, स्मरन् पञ्चनमस्कृतिम्। प्रतलीकृतदुष्कर्मा, चाणिक्यःस्वर्गमीयिवान् ॥३२६॥ सुबन्धुना नृपोऽन्येद्यु–र्व्यज्ञप्यत यथा मम। देव प्रसीद चाणिक्य–वेश्मदानान्नृपोऽप्यदात् ॥३२७॥ गतः सुबन्धुस्तत्राथ, सर्वशून्ये गृहेऽखिले। एकमेवाऽपवरकं, पिहितद्वारमैक्षत ॥३२८॥ भविष्यत्यत्र सर्वस्व–मित्यसौ चिन्तयंस्ततः। द्वारमुद्घाटयामास, मञ्जूषामथ दृष्टवान् ॥३२९॥ अरेऽस्यां साररत्नानि, भविष्यन्तीति चिन्तया। भित्वा तालकमुद्घाट्या–पश्यद्गन्धसमुद्गकम् ॥ ३३० ॥ हुं जाने बीजकान्यत्र, भाविनीति विभावयन्। तमप्युद्घाट्य पश्यन्न–पश्यद्गन्धान् सपत्रकान् ॥ ३३१ ॥ ततोऽतिसुरभीन् गन्धां–स्तानाघ्रायाऽथ पत्रकम्। वाचयन् ददर्श तत्र, गन्धाघ्राणोत्तरां क्रियाम् ॥ ३३२ ॥ एतानाघ्राय यो गन्धान्। जलं पिवति शीतलम्। भुंक्ते सर्वरसं भोज्य–मग्रःकृतसुधं सुधीः ॥ ३३३ ॥ कर्पूरकुसुमादीनां, गन्धं सुरभि जिघ्रति। निरूपयति रूपाणि, मनोहारीणि सस्पृहः ॥ ३३४ ॥ वेणुवेणुरवोन्मिश्राः। शृणोति कलगीतिकाः। सविलासाङ्गनासङ्ग–लालसो बोभवीति च ॥ ३३५ ॥ किं बहूक्तेन पञ्चानां, विषयाणां मनोरमम्। भजत्येक-

मपि क्षिप्रं, जायते स यमातिथिः ॥ ३३६ ॥ यस्तु मुण्डितमुण्डास्यः, प्रान्ताशी मलिनांशुकः । अस्नानी मुनिदृष्ट्यैव, वर्त्ततेऽत्र स जीवति ॥ ३३७ ॥ तदर्थमत्ययायाऽथ, नरः कश्चित् सुबन्धुना । गन्धानाघ्राय सर्वाक्ष–सौख्यैरायोजितो मृतः ॥ ३३८ ॥ सोऽथ दध्यौ धिग्धिङ् मे, धीमांश्चाणिक्य एव हि । यन्मृतेनाऽपि तेनाऽह–मेवं जीवन्मृतः कृतः ॥ ३३९ ॥ मुनिवेषस्ततः स्थित्वा, नटवद्भाववर्जितः । अभव्यः पातकी सोऽथ, भवेऽनन्ते भ्रमिष्यति ॥ ३४० ॥ राज्ञश्च बिन्दुसारस्य, कुर्वतो राज्यमुज्ज्वलम् । पृथिवीतिलकाख्याया, महादेव्याः सुतोऽभवत् ॥ ३४१ ॥ सच्छायः सुमनोरम्यः, सद्दालिप्रियतां गतः । अशोकश्रीरशोकश्रीः, कौतुकं सफलोदयः ॥ ३४२ ॥ सोऽथाधीयन्नविश्रान्तः सङ्क्रान्तनवयौवनः यौवराज्यपदे राज्ञा, विहितो गुणवानिति ॥ ३४३ ॥ क्रमादुपरते राज्ञि, सामन्तसचिवादिभिः । स एव स्थापितो राज्ये, राज्यधूर्वहनक्षमः ॥ ३४४ ॥ कुणाल इति तस्यापि, तनुभूः पुण्यभूरभूत् । जातमात्रोऽपि यः पित्रा, यौवराज्यपदे कृतः ॥ ३४५ ॥ मा भूद्विमातृकस्यास्य, विमातृभ्योऽत्र किञ्चन । इत्यालोच्य च भूपालः, कुणालं पुत्रवत्सलः ॥ ३४६ ॥ चतुरङ्गचमूयुक्तं, प्रधानामात्यसङ्गतम् । कुमारं भक्तिदत्ताया–मवन्त्यां प्रैषयत् पुरि ॥ ३४७ ॥ स्नेहातिशयतस्तत्र भूपतिः प्रतिवासरम् । स्वहस्तलिखिताँल्लेखान् प्राहिणोति स्म सादरम् ॥ ३४८ ॥ ज्ञात्वाऽन्येद्युः कलायोग्यं कुमारं मन्त्रिणं प्रति । अधीयतां नः पुत्रोऽय–मिति लेखेऽलिखन्नृपः ॥ ३४९ ॥ अनुद्धानाक्षरं तं चा–ऽसंवर्त्यैव महीपतिः । तत्रैव स्थानके मुक्त्वा, गतवान् देहचिन्तया ॥ ३५० ॥ राज्ञी काचिच्च तं दृष्ट्वा, दध्यौ कस्य कृते स्वयम् । लेखं लिखति राजेन्दु–रेवमत्यन्तमादृतः ॥ ३५१ ॥ ततस्तं वाचयित्वा सा, राज्यमिच्छुः स्वसूनवे । दत्वा बिन्दुमकारस्य तथैव तमतिष्ठिपत् ॥ ३५२ ॥ अभ्येयुषा नरेन्द्रेण, कथञ्चिद् व्यग्रचेतसा । संवर्त्त्याऽप्रतिवाच्यैव, लेखः प्रैषि विमुद्र्य च ॥ ३५३ ॥ कुमारोऽपि समासाद्य, तं वाचयितुमार्पयत् । वाचयित्वा मनस्येव, स तु मौनेन तस्थिवान् ॥ ३५४ ॥ अथोच्यत कुमारेण, किं न वाचय-

१ मुने.

सि द्रुतम् । तथाप्यजल्पतस्तस्मात् , स्वयमादाय वाचितः ॥ ३५५ ॥ अन्धीयतान्नः पुत्रोऽय–मित्यालोक्याऽऽह वाहकान् । मौर्यवंश-भुवां राज्ञां, नाऽऽज्ञा केनापि खण्ड्यते ॥ ३५६ ॥ तल्लेखार्थं करिष्येऽहं, मन्त्रिणोऽथ तमभ्यधुः । कार्यं देव ! पुनर्दृष्ट्वा, स ऊचे किं विमर्शनैः ॥ ३५७ ॥ इत्युक्त्वा सहसैवासौ, सुतप्रायःशलाकया । भवितव्यतयैवोक्तः, स्वयमानञ्ज चक्षुषी ॥ ३५८ ॥ तच्चाकर्ण्य नृपः सद्यः, पतितो दुःखसागरे । चिन्तयामास धिगहो, दुर्गमं दैववल्गितम् ॥ ३५९ ॥ अन्यथा चिन्त्यते हर्षो–च्छालमूर्छालमानसैः । जायते चाऽन्यथा सैष, कार्यारम्भो विधेर्वशात् ॥ ३६० ॥ यदेव कुरुते दैवं, तदेव भवति ध्रुवम् । इदं करिष्यते नेद–मिति चिन्ता वृथा नृणाम् ॥ ३६१ ॥ ततस्तस्य ददौ ग्रामं, राज्यमन्धो हि नाऽर्हति । दत्तमुज्जयिनीराज्यं, तद्विमातृसुतस्य तत् ॥ ३६२ ॥ पारंपर्येण च ज्ञात्वा, तद्विमातृविजृम्भितम् । कुणालो हृदये दायान् , दत्ते घृष्टः करोति किम् ॥ ३६३ ॥ अथ तत्र स्थितो ग्रामे, निःकर्माऽल्पपरिच्छदः । गतिप्रसक्त्या दैवस्य, दिवसानस्ति पूरयन् ॥ ३६४ ॥ अत्राऽन्तरे स रङ्कात्मा, तावद्धर्मप्रभावतः । गर्भे कुणालभार्यायाः, समुत्पेदे स्फुरच्छ्रियः ॥ ३६५ ॥ मासद्वये व्यतिक्रान्ते, देवगुर्वादिपूजने । अभवद्दोहदस्तस्याः, कुणालेन च पूरितः ॥ ३६६ ॥ तनयं जनयामास, पूर्णेष्वथ दिनेषु सा । वर्द्धितः प्रियदास्या च, कुणालः पुत्रजन्मना ॥ ३६७ ॥ ततो विमातुर्विफलं, करोम्येष मनोरथम् । गृह्णामि तन्निजं राज्य–मिति ध्यात्वा तदैव सः ॥ ३६८ ॥ कुणालो निर्ययौ ग्रामात्, पाटलीपुत्रमासदत् ॥ अगायच्च तदा गोष्ठ्यां, राजमार्गसमीपगः ॥ ३६९ ॥ तस्यातिस्वर-सौन्दर्य–रश्मिनेव नियन्त्रितः । तत्र यो यः संचचार, निःप्रचारः स सोऽभवत् ॥ ३७० ॥ रञ्जितस्तद्गुणैः सर्वैः, शशंसैकमुखो जनः । हाहाहूहू प्रभृतिका–नमंस्तास्यैव शिष्यकान् ॥ ३७१ ॥ अभवच्चद्गुणोल्लापः, सभायां भूपतेरपि । आजूहवत् तं राजापि, कौतुकं कस्य नोऽद्भुते ॥ ३७२ ॥ सोऽप्यथागत्य राजाग्रे, जवन्यन्तरितो जगौ । राजानो येन पश्यन्ति, नाऽङ्गिनो विकलाङ्गकान् ॥ ३७३ ॥ तस्याऽ

१ द्दवरिकया.

तिशायिना तेन, तुष्टो गीतेन गोपतिः । तमूचे भो वृणु वरं, सोऽपि गीत्यैव गीववान् ॥ ३७४ ॥ प्रपौत्रश्चन्द्रगुप्तस्य, बिन्दुसारस्य नप्तृकः । अशोकश्रीतनूजोऽन्धः, काकिणीमेष याचते ॥३७५॥ तद्‌श्रुत्वाऽमुञ्चताश्रूणि, जवनीमपनीय ताम् । कुणालमङ्कमारोप्य प्रोचेऽल्पं वत्स ! याचितम् ॥ ३७६ ॥ अथोचे मन्त्रिणा तत्र, नास्त्यल्पं देव ! याचितम् । राज्यं हि राजपुत्राणां, काकिणीत्यभिधीयते ॥ ३७७ ॥ राजोचे राज्यमस्यैव, संकल्पितमभून्मया । परं दैवमभूद्वामं, तत् कथं दीयतेऽस्य तत् ॥ ३७८ ॥ कुणालः स्माह मत्पुत्र–स्तात ! राज्यं करिष्यति । राज्ञाऽवोचत् कदाऽभूत्ते, पुत्रः स स्माह संप्रति ॥ ३७९ ॥ संप्रतीत्यभिधां तस्य, ततश्चक्रे तदैव राट् । दशाहोऽनन्तरं तं चाऽऽनाय्य राज्यं निजं ददौ ॥ ३८० ॥ गतः क्रमात् परां प्रौढिं, भरतार्द्धमसाधयत् । अप्यनार्यान् जनपदान् , स्ववशीकुरुते स्म सः ॥३८१ ॥ संप्रतेः साधिताशेषक्षोणीचक्रस्य चक्रिवत् । उज्जयिन्यामुज्जयिन्यां, पुर्यामाजग्मुषोऽन्यदा ॥ ३८२ ॥ जीवितस्वामिप्रतिमां, नन्तुं संयमयात्रया । आजग्मतुः क्रमादार्यौ, महागिरिसुहस्तिनौ ॥ ३८३ ॥ तदानीं चान्तरङ्गारीन् , जिगीषोरिव निर्ययौ । स्वनन्निस्वानवद्याग्रे–र्जीवितस्वामिनो रथः ॥ ३८४ ॥ महागिरिसुहस्तिभ्यां, सङ्घेन च परिष्कृतः । पुर्यामस्खलितः स्वैरं, भ्राम्यन् प्राकाम्यसिद्धवत् ॥ ३८५ ॥ आजगाम नरेन्द्रस्य, सौधद्वारं महोत्सवैः । गवाक्षस्थः क्षितीशोऽपि, प्रैक्षताऽऽर्यसुहस्तिनं ॥ ३८६ ॥ दध्यौ विलोक्य तं चैवं, क्वाऽप्येनं दृष्टपूर्व्यहम् । परं दृष्टचरः कुत्रे–त्यामृशन् मूर्च्छयाऽपतत् ॥ ३८७ ॥ अथ सन्नैः परिजनैः संसिक्तश्चन्दनादिभिः । वीजितस्तालवृन्ताद्यैः, स्मृतप्राग्जातिरुत्थितः ॥३८८॥ ततस्तदैव तं ज्ञात्वा, स प्राग्भवगुरुं सुधीः । गत्वा तत्रानमद्भक्त्या, पप्रच्छ च कृताञ्जलिः ॥३८९॥ किं फलं भगवन्नर्ह–द्धर्म्मकल्पमहीरुहः । अवोचंस्ते फलं राजं–स्लाभः स्वर्गापवर्गयोः ॥३९०॥ पुनरूचे स किं पूज्या, अव्यक्तव्रतजं फलम् । गुरवोऽप्यभ्यधुर्भूप, ! भूपतित्वादिकं फलम् ॥ ३९१ ॥ ततः प्रत्ययितो राजा–ऽवोचज्जानीत मां न वा । गुरुः श्रुतोप-

---

१ कुणालः

योगेन, विज्ञाय नृपमभ्यधात् ॥ ३९२ ॥ मुष्टपलक्षयामस्त्वां, शिष्यो नः प्राग्भवे भवान्। ततो हर्षप्रकर्षेण, वन्दित्वा सोऽवदद् गुरून् ॥ ३९३ ॥ भवभ्रमपरिश्रान्त–जन्तुविश्रामपादप !। कारुण्यामृतजीमूत !, श्रुतरत्नमहोनिधे ! ॥ ३९४ ॥ तदानीं यदि मे स्वामिन्नाकरिष्यत् कृपां भवान्। ततोऽहं क्षुत्पिपासाऽऽर्त्या–ऽगमिष्यं क्वापि दुर्गतौ ॥ ३९५ ॥ भवत्पादप्रसादेन, साम्राज्यमिदमद्भुतम्। प्राप्तं स्वामिन् मयेदानीं, यत्कर्तव्यं तदादिश ॥ ३९६ ॥ ततो गुरुभिराचख्ये, जैनधर्मफलं त्वया। साक्षाद्दृष्टं स्वयं वत्स, तत्तत्रैवादरं कुरु ॥ ३९७ ॥ ततः सम्यक्त्वमूलं स, श्राद्धधर्मं प्रपेदिवान्। तरीतुं भवपाथोधिं, सुश्वेतपटपोतवत् ॥ ३९८ ॥ अर्हति स्माऽर्हतामर्हान् , पूजयाऽष्टप्रकारया। उपास्ते स्म गुरून् व्याख्या–रसपानैकलालसः ॥ ३९९ ॥ ददौ दानमनिर्विण्णः, सङ्घमार्चयदर्हताम्। प्रावर्तयच्च सर्वत्र, प्रतिबोध्य कृपां नृपः ॥ ४०० ॥ प्रतिग्रामं प्रतिपुरं, चैत्यैरतत्कारितैस्तदा। बभूव भूमिः सर्वाङ्ग–मुक्तामयविभूषणा ॥ ४०१ ॥ अभूवन्नार्हताः सर्वे, तदा मिथ्यादृशोऽपि हि। यतो राजानुगो लोकः, स्फातिः पुण्यानुगा यथा ॥ ४०२ ॥ सुसाधुश्रावकेणाऽथ, प्रतिबोधयितुं तदा ॥ अपि प्रत्यन्तभूपाला, स्तेन सर्वेऽपि शब्दिताः ॥४०३॥ आयाताश्च स्वयं राज्ञा, धर्ममाख्याय विस्तरात्। तेऽपि प्रग्राह्य सम्यक्त्वं, श्रमणोपासकाः कृताः ॥ ४०४ ॥ तथैव तस्थुषां तेषां, विहृत्य समयान्तरे। महागिरिः सुहस्ती च, पुनरत्रेयतुर्गुरू ॥ ४०५ ॥ चैत्ये यात्रा तदा चक्रे, उज्जयिन्या महाजनैः। अनन्तरं च प्रारेभे, रथयात्रामहोत्सवः ॥ ४०६ ॥ तदा संप्रतिसाम्राज्ये, जिनधर्मे महौजसि। विनिर्ययौ रथः स्थाना–न्महिम्नाऽतिमहीयसा ॥ ४०७ ॥ पुष्पितारामवत् पुष्पैः, फलौघैः कल्पवृक्षवत्। महादूष्यापण इव, परिधाननिकाशनैः ॥ ४०८ ॥ रणतूर्यायितैर्वाद्यै–र्मोहं व्यामोहयन्निव। गृहे गृहेऽष्टपूजाग्रं, गृह्णानो माङ्गलिक्यवत् ॥ ४०९ ॥ सोल्लासरासकासक्त–स्त्रैणहल्लीसकः पुरः। परितः स्फारशृङ्गारै–र्गीयमानाङ्गनाजनैः ॥ ४१० ॥ विलासिनीकरोत्क्षिप्तै,–र्विज्यमानश्च चामरैः। जंभारिकुञ्जर इव प्रेक्ष्यमाणः स्मितैर्नरैः ॥ ४११ ॥ इत्थं निरुपमोत्साहः, प्रीताखिलनरामरः। अगादुपनृपावास–द्वारं जैनो

महारथः ॥ ४१२ ॥ तत्राऽऽगत्य स्वयं राजा, समं सामन्तपार्थिवैः । तं पूर्णविधिनाऽभ्यर्च्य, पुष्पाण्यग्रे प्रकीर्य च, ॥ ४१३ ॥ महाप्रभावनां कुर्व-स्तमनुव्रज्य संप्रतिः । तेषां राज्ञां विधिं सर्वं, दर्शयित्वाऽगमत् गृहान् ॥ ४१४ ॥ ततः स तान्नृपान् स्माह, न नः कार्यं धनेन वः । मन्यध्वे स्वामिनं चेन्मां, तद् भवन्तोऽत्र संप्रति ॥ ४१५ ॥ धर्मं प्रवर्त्तयन्त्वेनं, लोकद्वयसुखावहम् । स्वस्वदेशेषु सर्वत्र, प्रीतिरेवं यतो मम ॥ ४१६ ततस्तेऽपि गतास्तत्र, जिनचैत्यान्यकारयन् । कुर्वते तत्र यात्राश्च, रथयात्रोत्सवाद्भुताः ॥ ४१७ ॥ सदैवोपासते साधू-नमारिं घोषयन्ति च । राजानुवृत्त्या तत्रापि, लोकोऽभूद्धर्मतत्परः ॥ ४१८ ॥ ततश्च साधुसाध्वीनां विहर्त्तुं साधुचर्यया । प्रत्यन्ता अपि देशास्ते, मध्यदेश इवाभवन् ॥ ४१९ ॥ अन्यदा संप्रतिर्दध्यौ, साधवो विहरन्ति चेत् । अनार्येष्वपि देशेषु, स्यात्तल्लोकोऽपि धर्मवित् ॥ ४२० ॥ अथानार्यानपि नृपा-नादिदेश दिशांपतिः । करं यूयं दद्ध्वं मे, यथा गृह्णन्ति मद्भटाः ॥ ४२१ ॥ ततोऽनुशिष्य सुभटान् , प्रैषयन् मुनिवेषिणः । तेऽपि तत्र गतास्तेषां, साधुचर्यामथादिशन् ॥ ४२२ ॥ अगच्छतामभिगमो-ऽनुयानं गच्छतामथ । क्रियते नः प्रणामश्च, भून्यस्तकरजानुकैः ॥ ४२३ ॥ अन्नं पानं च शय्या च, वस्त्रपात्रादि वस्तु च । द्विचत्वारिंशता दोषै-रुज्झितं नः प्रदीयते ॥ ४२४ ॥ पठ्यन्ते च नमस्कार-मन्त्रशक्रस्तवादयः । अर्हन्तस्त्रिः प्रपूज्यन्ते, जीवेषु क्रियते कृपा ॥ ४२५ ॥ एवं च संप्रतिर्भावी, सुप्रसन्नोऽन्यथा न तु । तेऽपि तत्तद् व्यधुः सर्वं, ततस्तोषयितुं नृपम् ॥ ४२६ ॥ सुभटा अप्यथागत्य, तद्वृत्तं भूभुजेऽभ्यधुः । गुरुम् विज्ञपयामास, ततः संप्रतिरन्यदा ॥ ४२७ ॥ प्रभो ! नानाप्रदेशे किं, विहरन्ति सुसाधवः ? । गुरुः स्माह जनस्तत्रा-ज्ञानी-मस्याद् व्रतं ततः ॥ ४२८ ॥ राजा प्रोचे प्रभो ! तर्हि, तदाचारं परीक्षितुम् । न्यप्रेषयध्वं प्रथमं, चरानिव तपोधनान् ॥ ४२९ ॥ ततो गुरुर्मुनीन् कांश्चि-द् भूपतेरुपरोधतः । आदिदेश विहाराय, तेष्वान्ध्रद्रमिलादिषु ॥ ४३० ॥ तानप्यालोक्य तेऽनार्या, विशिष्टानीव भूभुजः । वस्त्रान्नपानपात्राद्यै-स्तथैव प्रत्यलाभयन् ॥ ४३१ ॥ त्वदीयश्रावकस्त्वेन, रञ्जितास्ते तपोधनाः । आगत्य स्वगुरोः सर्वं,

कथयामासुरुल्मुदः ॥ ४३२ ॥ एवं सम्प्रतिराजस्य, शुश्रूषा सद्धर्मशुद्धयो । नित्यं साधुविहारेण, संजातास्तेऽपि भद्रकाः ॥ ४३३ ॥
स्मृत्वा प्राग्जन्मरङ्कत्वं, नरेन्द्रोऽन्येगुरात्मनः । पुर्याश्चतुर्षु द्वारेषु, सत्रागारानकारयत् ॥ ४३४ ॥ अनात्मपरिभागेन, यथेच्छमनिवारितम् ।
दीयते भोजनं तत्र, सर्वेषामपि नित्यशः ॥ ४३५ ॥ तत्रावशिष्टं चान्नादि, गृह्णते तन्नियोगिनः । उद्धृतग्राहिणो राज्ञा, पृष्टास्तेऽथ
स्वमूचिरे ॥ ४३६ ॥ नृपस्तानादिशद्देयं, युष्माभिर्यतिनामिदम् । प्रासुकं चैषणीयं च, सर्वमन्नाद्युद्धृतम् ॥ ४३७ ॥ भक्त्या परवशः
क्रीत–दोषं राजा विदन्नपि । इदं चोवाच तान् तुष्ये, वित्तं वो दास्यते मया ॥ ४३८ ॥ ततो राजाज्ञया तेऽपि, साधुभ्यो ददुरुद्धृतम् ।
तेऽप्यनौद्देशिकीभूत–मिदानीमित्यगृह्णत ॥ ४३९ ॥ अथादिशत् कान्दविकान्, दौष्यिकान् मान्धिकांस्तथा । तैलाज्यदधिपक्वान्न–फलादि-
वणिजोऽपि च ॥ ४४० ॥ गृह्णते साधवो यद्य–त्तत्तद्देयं तदीप्सितम् । मत्तस्तन्मूल्यमादेयं, निःशेषं क्रायिकादिना ॥ ४४१ ॥ राजपूज्यान्
सुसाधूंस्ता–नाकार्याकार्य तेऽप्यथ । इष्टेष्टतमवस्तूनि, ददिरे भक्तिका इव ॥ ४४२ ॥ जानन्नपि सदोषं तत्, सर्वमार्यसुहस्त्यपि । सेहे
स्नेहेन शिष्यस्य, को न मोहेन मोहितः ॥ ४४३ ॥ इतश्च गच्छबाहुल्या–द्विभिन्नोपाश्रयस्थितः । गुरुर्महागिरिः सर्वं, तज्ज्ञात्वोचे
सुहस्तिनम् ॥ ४४४ ॥ अनेषणीयं राजान्नं, संपूर्णदशपूर्व्यपि । अविदन्निव गृण्हासि, किमाचार्य ! विदन्नपि ? ॥ ४४५ ॥ सुहस्त्युवाच
भगवँ–ल्लोकः पूजितपूजकः । राजपूज्यान् विदन्नस्मान्, यच्छत्येवं तमाहृतः ॥ ४४६ ॥ ततस्तं मायिनं मत्वा, रोषादार्यमहागिरिः ।
बभाषे नो विसंभोगः, परस्परमतः परम् ॥ ४४७ ॥ सदृक्कल्पसदृक्छन्दैः, सम्भोगः साधुभिः सह । विपरीतस्वरूपत्वात्, त्वमस्माकं
पुनर्बहिः ॥ ४४८ ॥ भीतः सुहस्त्यपि ततो, वन्दित्वाऽऽर्यमहागिरिम् । ऊचे विनयनम्राङ्गः, कम्पमानकराञ्जलिः ॥ ४४९ ॥ अपराधं
क्षमस्वैक–मपराधवतः प्रभो ! । अपुनःकरणेनाऽस्तु, मिथ्यादुष्कृतमत्र मे ॥ ४५० ॥ महागिरिस्ततः स्माह, दोषः कोऽत्र तवाथवा । इदं

१ अधिकारिणः

प्रोवाच भगवान्, वीरस्वामी स्वयं पुरा ॥ ४५१ ॥ इहास्माकीनसन्ताने, स्थूलभद्रादतः परम् । पतत्प्रकर्षा साधूनां, समाचारी भविष्यति ॥ ४५२ ॥ तस्माच्चानन्तरावावा-मेव तीर्थप्रवर्त्तकौ । अभूव तदिदं स्वामि-वचः सत्यापितं त्वया ॥ ४५३ ॥ इत्युदित्वा तमाचार्यं, सद्भावक्षमितागसम् । पुनः साम्भोगिकं चक्रे, गुरुरार्यमहागिरिः ॥ ४५४ ॥ उक्तश्च संप्रतिरपि, महाराज ! न कल्पते । सुसाधूनां राजपिण्डो-ऽनेषणीयो विशेषतः ॥ ४५५ ॥ निषिद्धो भरतस्यापि, राजपिण्डः पुरा किल । श्रीयुगादिजिनेन्द्रेण, स्वयमिन्द्रादिसाक्षिकम् ॥ ४५६ ॥ दानपात्रं च तस्यापि, श्रावकश्राविकाजनः । स्वामिनाख्यायि तद्वत्स, गच्छ त्वमपि तत्पथम् ॥ ४५७ ॥ अनुशास्ति गुरोस्तां स, निर्वृत्तेः पदवीमिव । आदाय परमानन्द-मग्नो धर्ममपालयत् ॥ ४५८ ॥ आर्यानार्येषु देशेषु, हृदयस्थानके नृणाम् । स्वामाज्ञामिव सम्यक्त्व-मुवापावर्द्धयच्च सः ॥ ४५९ ॥ श्रीसंप्रतिः क्षितिपतिर्जिनराजधर्म्मं, सम्यक्त्वमूलममलं परिपाल्य सम्यक् । भुक्त्वा दिवः श्रियमथानुपमामनर्घ्यां, मुक्तिं गमिष्यति शुभैकमतिः क्रमेण ॥ ४६० ॥ सम्यक्त्वरत्नं तदिदं विशुद्ध-मासाद्य युष्माभिरपीह भव्याः । स्वपुत्रवन्निर्मलचित्तरङ्गैः, पाल्यं सदा निर्वृतिमाप्तुकामैः ॥ ४६१ ॥

॥ इति श्री सम्यक्त्वेसंप्रतिनरेशकथा ॥ श्रेयोऽस्तु ॥

पीयूषोदरसोदरैर्जलभरैः पुष्णन्तु वार्दा धरां, नित्यं नीतिपरायणा नृपतयो भूमीमिमां बिभ्रताम् ।
धात्री धान्यवती भवत्वनुदिनं लक्ष्मीर्जनानां गृहे, श्रेयः श्रेणिनिकेतनं विजयतां श्री जैनधर्मः सदा ॥ १ ॥
सूर्याचन्द्रमसौ प्रदक्षिणयतो यावत् सुवर्णाचलं, यावज्छ्रीजिनचैत्यमण्डनवती सर्वसहा राजते ।
तावत् संप्रतिभूपतेर्विजयतां सम्यक्त्वपूतात्मनः, सम्यक्त्वप्रतिबोधकारि भविनामेतच्चरित्रं क्षितौ ॥ २ ॥

बहुविधमुनिशिल्पिग्रन्थितानेकशास्त्र—वरकुसुमविचित्राऽऽनन्दसन्दोहदात्री ।

## ॥ इति श्रीरत्नप्रतिनृपतिचरित्रम् ॥

हरतु बुधजनानां मानसं भव्यरम्या जयविजयमुनीन्द्रग्रन्थमाला मनांसि ॥